# श्री दुर्गा वन्दना

सर्वमंगलमंडल्ये शिवे सर्वार्थ साधिके।

शरण्ये त्र्यम्बके गौरी नारायणी नमोस्तु ते।।

शरणागतदीनार्तपरित्राण परायणे।

सर्वस्यातिहरे देवि नारायण नमोस्तु ते।।

ऊँ सर्वस्वरूपे सर्वेश सर्वेशे सर्वशक्तिसमन्विते।

भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते

या श्रीः स्वयं सुकृतिनां भवनेष्व लक्ष्मीः ।

पापात्मनां कृतधियां हृदयेषु बुद्धिः

श्रद्धा सतां कुलजनप्रभवस्य लज्जा।

तां त्वां नताः स्म परिपालय देवि विश्वम् ।।

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः

स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।।

दारिद्र्यदुःखभयहारिणि का त्वदन्या

सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता।।

देवि प्रपन्नार्तिहरे प्रसीद ।

प्रसीद मातर्जऽगतोखिलस्य ।।

प्रसीद विश्वेश्वर पाहि विश्वं ।

त्वमीश्वरी देवि चराचरस्य ।।

जयन्ती मङ्गला काली भद्रकाली कपालिनी।

दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते।।

देहि सौभाग्यमारोग्यं देहि मे परंमं सुखम्

रूपं देहि जयं देहि यशो देहि द्विषो जहि ।।

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते।

स्वर्गापवर्गदे देवि नारायणि नमोस्तु ते।।


www.astromanu.com

mob no-7983298169